# common shlokas used for recitationset 1

# શ્લોકસઙ્ગ્રહ ૧

## Document Information

Text title : Shloka

File name : shloka1.itx

Category : misc, shloka

Location : doc_z_misc_general

Latest update : April 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 18, 2025

*sanskritdocuments.org*

# શ્લોકસઙ્ગ્રહ ૧

ૐ

વક્રતુણ્ડ મહાકાય કોટિસૂર્યસમપ્રભ ।
નિર્વિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥

યા કુન્દેન્દુ તુષાર્ હાર ધવલા યા શુભ્રવસ્ત્રાવૃતા ।
યા વીણાવરદણ્ડ મણ્ડિતકરા યા શ્વેતપદ્માસના ।
યા બ્રહ્માચ્યુતશઙ્કરપ્રભૃતિભિર્દેવૈ સદા વન્દિતા ।
સા માં પાતુ સરસ્વતી ભગવતી નિઃશેષ જાડ્યા પહા ॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુઃ સાક્ષાત્પરબ્રહ્મ તસ્મૈ શ્રી ગુરવેનમઃ ॥

કરાગ્રે વસતે લક્ષ્મીઃ કરમધ્યે સરસ્વતી ।
કરમૂલે તુ ગોવિન્દઃ પ્રભાતે કરદર્શનમ્ ॥

સમુદ્રવસને દેવિ પર્વતસ્તનમણ્ડલે ।
વિષ્ણુપત્નિ નમસ્તુભ્યં પાદસ્પર્શં ક્ષમસ્વ મે ॥

શાન્તાકારં ભુજગશયનં પદ્મનાભં સુરેશમ્ ।
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાઙ્ગમ્ ।
લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગમ્યમ્ ।
વન્દે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથમ્ ॥

સર્વેઽપિ સુખિનઃ સન્તુ સર્વે સન્તુ નિરામયાઃ ।
સર્વે ભદ્રાણિ પશ્યન્તુ મા કશ્ચિત્દુઃખભાગ્ભવેત્ ॥

યા દેવી સર્વભૂતેષુ માતૃરુપેણ સંસ્થિતઃ ।
યા દેવી સર્વભૂતેષુ શક્તિરુપેણ સંસ્થિતઃ ।
યા દેવી સર્વભૂતેષુ શાન્તિરુપેણ સંસ્થિતઃ ।
નમસ્તસ્યૈઃ નમસ્તસ્યૈઃ નમસ્તસ્યૈઃ નમો નમઃ ॥

ॐ ણમો અરિહન્તાણં
ॐ ણમો સિદ્ધાણં
ॐ ણમો આયરિયાણં
ॐ ણમો ઉવજ્ઝાયાણં
ॐ ણમો લોએ સવ્વસાહુણં
એસો પઞ્ચ ણમોકારો સવ્વ પાવપણાસણો ।
મઙ્ગલાણં ચ સવ્વેસિં પઢમં હવઇ મઙ્ગલમ્ ।
સર્વ મઙ્ગલ માઙ્ગલ્યે શિવે સર્વાર્થ સાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરી નારાયણી નમોઽસ્તુતે ॥

વસુદેવ સુતં દેવં કંસ ચાણૂરમર્દનમ્ ।
દેવકી પરમાનન્દં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥

બ્રહ્માર્પણં બ્રહ્મ હવિઃ બ્રહ્માગ્નૌ બ્રહ્મણા હુતમ્ ।
બ્રહ્મૈવ તેન ગન્તવ્યં બ્રહ્મકર્મસમાધિના ॥

રામ રામેતિ રામેતિ રમે રામે મનોરમે ।
સહસ્રનામતત્તુલ્યં રામનામ વરાનને ॥

શુભં કરોતિ કલ્યાણં આરોગ્યં ધનસમ્પદા ।
શત્રુબુધ્દિવિનાશાય દીપજ્યોતિ નમોઽસ્તુતે ॥

કર્મણ્યેવાધિકારસ્તે મા ફલેષુ કદાચન ।
મા કર્મફલહેતુર્ભિઃ મા તે સઙ્ગોસ્ત્વ કર્મણિ ॥

કરચરણ કૃતં વાક્કાયજં કર્મજં વા ।
શ્રવણનયનજં વા માનસં વાપરાધમ્ ।
વિહિતમવિહિતં વા સર્વમેતત્ક્ષમસ્વ ।
જય જય કરુણાબ્ધે શ્રીમહાદેવ શમ્ભો ॥

ॐ સહ નાવવતુ । સહ નૌભુનક્તુ ।
સહ વીર્યં કરવાવહૈ ।
તેજસ્વિ નાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ॥

ત્વમેવ માતા ચ પિતા ત્વમેવ ।
ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ ।

ત્વમેવ સર્વં મમ દેવદેવ ॥

ૐ અસતો મા સદ્ગમય । તમસો મા જ્યોતિર્ગમય ।
મૃત્યોર્મા અમૃતં ગમય ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્ પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

---

*common shlokas used for recitationset 1*

pdf was typeset on April 18, 2025

Please send corrections to *sanskrit@cheerful.com*